http://www.mpboardonline.com

Serial Number ↓

| E-808 | Roll No. ...................................... |
|---|---|
| Higher Secondary Examination (Regular) - 2020 | |

# संस्कृत (सामान्यम्)
# SANSKRIT (General)

| Total Questions : 22 | Total Printed Pages : 8 | Time : 3 Hours | Maximum Marks : 100 |
|---|---|---|---|

निर्देशाः – (i) सर्वे प्रश्नाः अनिवार्याः सन्ति ।

(ii) प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः ।

1 उचित विकल्पं चित्वा लिखत – **1×5=5**

(अ) "चन्द्रशेखरः" इत्यस्मिन् पदे समासः अस्ति –

(i) द्विगुः (ii) द्वन्द्वः

(iii) तत्पुरुषः (iv) बहुब्रीहिः

(ब) "दीनदानम्" इत्यस्य पदस्य समासविग्रहः अस्ति –

(i) दीनं दानम् (ii) दीनाय दानम्

(iii) दीन दानाय (iv) दीने दानम्

(स) "सौन्दर्यबोधः" इत्यस्मिन् पदे समासः अस्ति –

(i) द्वन्द्व समासः (ii) द्विगु समासः

(iii) तत्पुरुष समासः (iv) अव्ययीभाव समासः

(द) 'विशेष्य विशेषण प्रधानः' समासः अस्ति –

(i) द्विगुः (ii) अव्ययीभावः

(iii) कर्मधारयः (iv) द्वन्द्वः

(इ) "निः + छलः" इत्यस्य सन्धिः अस्ति –

(i) निस्छलः (ii) निशछलः

(iii) निषछलः (iv) निश्छलः



http://www.mpboardonline.com

http://www.mpboardonline.com
http://www.mpboardonline.com

http://www.mpboardonline.com

2 उचित विकल्पं चित्वा लिखत – 1×5=5

(अ) अधोलिखितेषु अव्ययं नास्ति –
(i) यत्र (ii) तत्र
(iii) सर्वत्र (iv) पुत्रः

(ब) "पुरा कवीनां कालिदासः श्रेष्ठः" । अस्मिन् वाक्ये अव्ययम् अस्ति –
(i) पुरा (ii) कवीनां
(iii) कालिदासः (iv) श्रेष्ठः

(स) अधोलिखितेषु अव्ययम् अस्ति –
(i) मित्र (ii) अत्र
(iii) सत्र (iv) पत्र

(द) "बालकः पुनः मोदकम् इच्छति" । वाक्ये अव्ययम् अस्ति –
(i) बालकः (ii) पुनः
(iii) मोदकम् (iv) इच्छति

(इ) "सुबन्तः" पदस्य सन्धि–विच्छेदः अस्ति –
(i) सु + अन्तः (ii) सुब् + अन्तः
(iii) सुप् + अन्तः (iv) सु + बन्तः

3 उचित विकल्पं चित्वा लिखत – 1×5=5

(अ) "कृतिः" इत्यस्मिन् पदे प्रत्ययः अस्ति –
(i) क्त (ii) क्तिन्
(iii) ङीप् (iv) ङीन्

(ब) "शानच्" प्रत्यस्य उदाहरणमस्ति –
(i) पठितवान् (ii) खादितवान्
(iii) सेवमानः (iv) गन्तव्यम्

(स) "अधिकतरः" इत्यस्मिन् पदे प्रत्ययः अस्ति –
(i) तरप् (ii) तमप्
(iii) टाप् (iv) मतुप्

(द) "नारी" पदे प्रत्ययः अस्ति –
(i) इष्ठन् (ii) ङीप्
(iii) ङीष् (iv) ङीन्

(इ) "हरिं वन्दे" इत्यत्र सन्धिः अस्ति –
(i) विसर्गसन्धिः (ii) व्यञ्जनसन्धिः
(iii) स्वरसन्धिः (iv) यण्सन्धिः



http://www.mpboardonline.com
http://www.mpboardonline.com
http://www.mpboardonline.com

http://www.mpboardonline.com

4 उचित विकल्पं चित्वा लिखत – 1×5=5

(अ) "अक्रुध्यत्" इत्यस्मिन् पदे लकारः अस्ति –
 (i) लट्लकारः (ii) लोट्लकारः
 (iii) लृट्लकारः (iv) लङ्लकारः

(ब) "स्युः" इत्यस्मिन् पदे पुरुषः अस्ति –
 (i) प्रथमपुरुषः (ii) मध्यमपुरुषः
 (iii) उत्तमपुरुषः (iv) महापुरुषः

(स) "कुर्मः" इत्यत्र वचनं अस्ति –
 (i) एकवचनम् (ii) द्विवचनम्
 (iii) बहुवचनम् (iv) अनेकवचनम्

(द) इन्द्रोऽपि लघुतां याति ............ प्रख्यापितैर्गुणैः ।
 (i) अपि (ii) परा
 (iii) भूयः (iv) स्वयं

(इ) पण्डितोऽपि वरं शत्रुर्न ............ हितकारकः ।
 (i) मूर्खो (ii) धर्मो
 (iii) अर्थो (iv) शत्रोः

5 उचित विकल्पं चित्वा लिखत – 1×5=5

(अ) "सलिलम्" इत्यस्य पर्यायशब्दः अस्ति –
 (i) अनलम् (ii) जलम्
 (iii) रसालम् (iv) जलजम्

(ब) "अचलः" इत्यस्य पर्यायशब्दः अस्ति –
 (i) स्थिरः (ii) चपलः
 (iii) चलः (iv) चंचलः

(स) "समर्थः" इत्यस्य विलोमशब्दः अस्ति –
 (i) सफलः (ii) परार्थः
 (iii) अर्थः (iv) असमर्थः

(द) "आत्मानम्" इत्यत्र विभक्तिः अस्ति –
 (i) प्रथमा (ii) तृतीया
 (iii) द्वितीया (iv) षष्ठी

(इ) "पूर्वास्मिन्" पदे विभक्तिः अस्ति –
 (i) सप्तमी (ii) षष्ठी
 (iii) पञ्चमी (iv) तृतीया



http://www.mpboardonline.com
http://www.mpboardonline.com
http://www.mpboardonline.com

http://www.mpboardonline.com

6 अधोलिखितेषु प्रश्नेषु त्रयाणां प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एक वाक्येन देयानि – 2×3=6

(i) शम्भोः आराधनं किम् ?

(ii) कीर्तिभवनस्य चत्वारः स्तम्भाः के ?

(iii) विश्वामित्रः तपोबलेन के लब्धवान् ?

(iv) ज्योतिश्शास्त्रेषु किम् अस्ति ?

(v) भरतः किमर्थं मूर्च्छितं भवति ?

7 महाकविः कालिदासस्य नाटकद्वयं नाम्नी लिखत । 2

**अथवा**

"बुद्धचरितम्" कस्य रचना अस्ति ? अस्मिन् महाकाव्ये कति सर्गाः सन्ति ?

http://www.mpboardonline.com

8 युग्ममेलनं कुरूत – (केचित् द्वे) http://www.mpboardonline.com 2

| | 'अ' | | 'ब' |
|---|---|---|---|
| (i) | रसगङ्गाधरम् | – | बाणभट्टः |
| (ii) | हर्षचरितम् | – | श्रीहर्षः |
| (iii) | नैषधीयचरितम् | – | पण्डितराजजगन्नाथः |

9 आदिकविः कः ? तेन कस्य ग्रन्थस्य रचनामकरोत् ? 2

**अथवा**

पुराणानि कति सन्ति ? कोऽपि द्वे पुराणयोः नाम्नी लिखत ।

10 कति वेदाः सन्ति ? नामानि लिखत । 2

**अथवा**

महाभारतस्य रचनाकारः कः ? अस्मिन् काव्ये कति पर्वाः सन्ति ?

11 अधोलिखितेषु त्रयाणाम् अशुद्धकारकवाक्यानां शुद्धिः करणीया – 3

(i) भूपतिः सिंहासने अध्यास्ते ।

(ii) शिवं नमः ।

(iii) लोकस्य उपर्युपरि शम्भुः अस्ति ।

(iv) ते पाटलीपुत्रं प्रति गच्छति ।

(v) नगरस्य बहिः मन्दिरम् अस्ति ।



http://www.mpboardonline.com

12 अधोलिखितेषु शब्देषु त्रयाणां शब्दानां रूपाणि निर्देशानुसारं लिखत – 3

(i) विद्वस् – षष्ठी बहुवचनम् ।

(ii) गो – प्रथमा बहुवचनम् ।

(iii) मनस् (मन) – तृतीया एकवचनम् ।

(iv) पूर्व (स्त्रीलिङ्गे) – द्वितीया द्विवचनम् ।

13 युग्ममेलनं कुरूत – 4

| | 'अ' | | 'ब' |
|---|---|---|---|
| (i) | हंसस्य | – | क्षेमेण स्वपुरे समागतः |
| (ii) | व्रजन्ति ते मूढधिपः पराभवं | – | बालुकाः |
| (iii) | कुसङ्गतिं वर्जयन् | – | दुग्धजलभेदविधौ |
| (iv) | प्रकीर्णाः | – | भवन्ति मायाविषु येन मायिनः |

14 अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृत – भाषायाम् एक पदेन लिखत – (कोऽपि **चत्वारः**) 4

(i) कण्वस्य पुत्र्याः नाम किम् ?

(ii) सोमस्य सुतः कः ?

(iii) वीरपुत्राणां का गतिर्भवति ?

(iv) द्रौपदी कस्य नृपस्य आत्मजा अस्ति ?

(v) कस्याः नाम अपर्णा ?

(vi) भूक्षरणं केन रुध्यते ?

(vii) स्पन्दनायाः सखी का ?

15 प्रदत्तैः शब्दैः अनुच्छेद लेखनं कुरूत – 4

[भवति, षट्, प्रमोदो, नृत्यन्ति, वसन्तः, उत्सवौ, नराः, पूर्णिमायां]

भारते ............. ऋतवः । तेषु ............. ऋतुराजः कथ्यते । चैत्रे वैशाखे च मासे वसन्तः ............. । वसन्तौ द्वौ प्रमुखौ ............. भवतः – वसन्तोत्सवः होलिकोत्सवः च । वसन्तोत्सवे सर्वत्र ............. भवति । ............. नार्यश्च सर्वत्र गायन्ति ............. च । होलिकोत्सवः फाल्गुनमासस्य ............. भवति ।

**अथवा**

[तपस्वी, परिभ्रमन्, भ्रमति, शुकः, ऋषिः, अगच्छत्, लोक कल्याणार्थम्, गृहे]

कश्चित् महान् ............. ऋषिः आसीत् । सः ............. अहर्निशं भूतले ............. स्म । एकदास ............. एकं ग्रामम् अगच्छत् । ग्रामस्य एकस्मिन् गृहे एकः ............. पालितः आसीत् । सः शुकः ऋषिं दृष्ट्वा 'मारयतु कुट्टयतु' इति वारं वारम् उच्चैः उक्तवान् अनन्तरं स ............. अपरं स्थानं ............. तत्रापि एकस्मिन् ............. शुकः पालितः आसीत् ।



http://www.mpboardonline.com

http://www.mpboardonline.com

http://www.mpboardonline.com

http://www.mpboardonline.com

16 प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकस्य सुभाषितद्वयं लिखत । 4

17 प्रदत्तैः शब्दैः चतुर्णां वाक्यानां रिक्तस्थानपूर्तिं कुरूत – 4

[तन्नाटकं, शरदः, सृष्टेः, विनायकः, संयतः, शून्यमिव]

(i) जीवेम .............. शतम् ।

(ii) न च .............. कश्चित् ।

(iii) सुखार्थी .............. भवेत् ।

(iv) पर्यावरण संरक्षणेव .............. संरक्षणम् ।

(v) गृहं सर्वं .............. भासते स्म ।

(vi) सुखदुःखोत्पत्तिकृतं .............. भवति ।

http://www.mpboardonline.com

http://www.mpboardonline.com

18 अधोलिखितगद्यांशेषु गद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – 2×4=8

(अ) पृथिव्यां यत्पर्यावरणं वर्तते तत्तु अतीव सन्तुलितमस्ति । पर्यावरणसन्तुलने सहाया ये जीवजन्तवः तेऽपि स्वार्थपूर्त्यै क्रूरतया व्यापादिताः । धनञ्च अस्माभिः अतीवार्जितम् । समस्त प्राणीनां कृते पर्यावरणमेव प्राकृतिक सौन्दर्यं सुखशान्तीं च प्रददाति । न कदापि पर्यावरणं स्वयमेव परस्परम् असन्तुलितं भवति ।

(i) पृथिव्यां यत्पर्यावरणं वर्तते तत् कीदृशमस्ति ?

(ii) के स्वार्थपूर्त्यै क्रूरतया व्यापादिताः ?

(iii) अस्माभिः अतीवार्जितम् किम् ?

(iv) केषां कृते पर्यावरणमेव प्राकृतिक सौन्दर्यं सुखशान्तीं च प्रददाति ?

(ब) "प्रथमेवयसि ब्रह्मचर्यपालनेन नियमसंयमौ सेवनीयाविति भारतस्य प्राचीनोपदेशे साम्प्रतं बहवोविप्रतिपद्यमाना वदन्ति अतिकठोरेयं साधनेति । सम्पद्यतां तावदनया कोऽपि कार्यक्षमो दृढः पुरुषः छिद्यन्तां वा वासनाप्रग्रहाः, जायतां वा तेनैकः स साधुः पुरुषः परन्तु कुतोऽत्र रसावस्थानं ? क्व गतं साहित्येन, चित्रेण, सङ्गीतेन वा ? यदि वस्तुतः पुरुषः पुरुष इवाभीप्सितः, न तर्हि सौन्दर्य चर्चा परित्याज्येति" ।

(i) प्रथमे वयसि किं पालयेत् ?

(ii) नियमसंयमौ कदा सेवनीयौ ?

(iii) का परित्याज्या न ?

(iv) "तेनैकः" इत्यस्मिन् पदे सन्धिः अस्ति ।



http://www.mpboardonline.com

(स) कर्त्तव्यकर्मणा एव जनकादिभिः सिद्धिः प्राप्ता । एवं लोककल्याणार्थं कर्त्तव्यकर्म अवश्यं करणीयंभवति । यथा भगवान् श्रीकृष्णः उक्तवान् – अवाप्तव्यार्थं अनवाप्तव्यार्थं च अहं कर्म न करोमि, तथैव निःस्वार्थभावेन फलकामनारहितेकर्मणि ज्ञानिभिः अपि वर्तितव्यम् । लोकसंग्रहार्थं कर्त्तव्यरूपं कर्म सर्वैः कार्यमेव ।

(i) केन जनकादिभिः सिद्धिः प्राप्ता ?

(ii) किमर्थं कर्त्तव्यकर्म अवश्यं करणीयं भवति ?

(iii) भगवान् श्रीकृष्णः किम् उक्तवान् ?

(iv) निःस्वार्थ भावेन फलकामनारहिते कर्मणि कैः अपि वर्तितव्यम् ?

19 अधोलिखितेषु पद्यांशेषु पद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – $2\times4=8$

(अ) अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्री गुरवे नमः ॥

(i) अखण्डमण्डलाकारं कः ?

(ii) चराचरं केन व्याप्तम् ?

(iii) तत्पदं केन दर्शितम् ?

(iv) कस्मै नमः ?

(ब) न मान्यमानो मुदम् आददीत,
न सन्तापं प्राप्नुयाच्चाऽवमानात् ।
सन्तः सतः पूजयन्तीह लोके,
नाऽसाधवः साधुबुद्धिं लभन्ते ॥

(i) मान्यमानः किं न आददीत ?

(ii) सन्तः कस्मात् सन्तापं न प्राप्नुयात् ?

(iii) इह लोके के सतः पूजयन्ति ?

(iv) असाधवः किं न लभन्ते ?

(स) वने रणे शत्रुजलाग्निमध्ये महार्णवे पर्वतमस्तके वा ।
सुप्तं प्रमत्तं विषमस्थितं वा रक्षन्ति पुण्यानि पुराकृतानि ॥

(i) वने नरं कानि रक्षन्ति ?

(ii) रणे च नरं कानि रक्षन्ति ?

(iii) सुप्तं प्रमत्तं वा विषमस्थितं कानि एव रक्षन्ति ?

(iv) "पुण्यानि" इत्यस्य पदस्य विलोम पदं लिखत ।



http://www.mpboardonline.com

http://www.mpboardonline.com

http://www.mpboardonline.com

http://www.mpboardonline.com

20 शुल्कमुक्त्यर्थं स्वस्य प्राचार्यस्य कृते संस्कृतभाषायाम् एकं पत्रं लिखत । 4

अथवा

स्वस्य पितरं प्रति संस्कृतभाषायाम् एकं पत्रं लिखत यस्मिन् भ्रमणार्थं गमनाय वर्णनं भवतु ।

21 अधोलिखितम् अपठितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – 5

कुटिलाः जनाः स्वभावेन परेषाम् अहितम् इच्छन्ति । तेषां शक्तिः परेषां पीडनाय, बुद्धिः च परेषांवञ्चनाय भवति । तेषां मनसि अन्यत्, वचसि अन्यत्, कर्मणि च अन्यत् भवति । शान्तिवचनानि तान् सन्मार्गे आनेतुं न प्रभवन्ति ।

शुनः पुच्छः प्रयत्नेनापि कुटिलतां न त्यजति ।

दुग्धं पीत्वा अपि सर्पाः विषं न त्यजन्ति ।

कुटिलाः कुटिलतया एव सन्मार्गम् आश्रयन्ति ।

(i) कुटिलाः जनाः किम् इच्छन्ति ?

(ii) कुटिलानां शक्तिः किमर्थं भवति ?

(iii) के दुग्धं पीत्वा अपि विषं न त्यजन्ति ?

(iv) कीदृशाः जनाः कुटिलतया एव सन्मार्गम् आश्रयन्ति ?

(v) कीदृशानि वचनानि कुटिलान् सन्मार्गे आनेतुं न प्रभवन्ति ?

22 अधोलिखितेषु एकस्मिन् विषये शतशब्देषु संस्कृतभाषायां निबन्धं लिखत – 10

(i) अस्माकं देशः

(ii) संस्कृतभाषायाः गौरवम्

(iii) परोपकारः

(iv) ग्राम्यजीवनम्

**http://www.mpboardonline.com**
**Whatsapp @ 9300930012**
**Send your old paper & get 10/-**
**अपने पुराने पेपर्स भैजे और 10 रुपये पायें,**
**Paytm or Google Pay से**



http://www.mpboardonline.com